यथा "ह्रकारस्य घकारोऽन्तरतमः" । इति भरतः ॥

अन्तरङ्गः, त्रि, (अन्तः सदृशं अङ्गं यस्य सः ।) आत्मीयः । स्वसम्पर्कः । यथा,—

"चरमगिरिकुरङ्गी शृङ्गकण्डूयनेन
स्वपिति सुखमिदानीमन्तरङ्गः कुरङ्गः" ।

इति कालिदासः ॥

अन्तरा,व्य, (अन्तरेति अन्तर + इन् + डा, टिभागलोपः ।) वर्ज्जनं । विना । यथा,—

("न द्रक्ष्यामः पुनर्जातु धार्म्मिकं राममन्तरा" ।
इति रामायणे ।) मध्यं । निकटं । इति मेदिनी ॥

अन्तरापत्या, स्त्री, गर्भिणी । अन्तरे उदरमध्ये अपत्यं यस्याः सा ॥

अन्तरायः, पुं, (अन्तरं व्यवधानं एति, अन्त + इन् + अच्, षष्ठीतत्पुरुषः ।) विघ्नः । इत्यमरः ॥

("स चेत् स्वयं कर्म्मसु धर्म्मचारिणां
त्वमन्तरायो भवसि च्युतो विधिः" ।

इति रघुवंशे ।)

अन्तरालं, क्ली, (अन्तरा मध्यं लाति, अन्तरा + ला + कः ।) मध्यप्रदेशः । अभ्यन्तरं । इत्यमरः ॥ ("मुकुरन्तरालसुवमस्तगिरिः सवितुश्च योषिदसिमीत दृशा" । इति माघः । "उदेति भानुर्गगनान्तराले" । इति पद्ममाला ।)

अन्तरालकं, क्ली, (अन्तराल + स्वार्थे कन् ।) अभ्यन्तरं । इति राजनिर्घण्टः ॥

अन्तरितं, त्रि, (अन्तरं इतं प्राप्तं द्वितीयातत्, अथवा अन्तरं व्यवधानं जातमस्य, अन्तर + तारकादित्वात् इतच् ।) अन्तर्द्धानप्राप्तं । व्यवहितं । तत्पर्य्यायः । प्रच्छन्नं २ । इति त्रिकाण्डशेषः । व्यवकलिताङ्कः । वाकि इति भाषा । इति लीलावती ॥

अन्तरिक्षं, क्ली,(अन्तर्मध्ये ऋक्षाणि नक्षत्राणि यस्य तत्,पृषोदरादित्वात् ऋकारस्य इकारः । अन्तरीक्षमिति पाठे ऋकारस्य ईकारः ।) अन्तरीक्षं । आकाशं । इति क्रान्दसं । इत्यमरटीकायां पुरुषोत्तमजातरूपसुभूतिरायादयः ॥

("अन्तरिक्षगतांश्चैव मुनीन् देवांश्च पीडयेत्" ।
इति मनुः ।)

अन्तरीपं, क्ली, पुं, (अन्तर्गता आपोऽत्र, तत्,समासान्तः अः, द्व्यन्तरुपसर्गेभ्य इति अपईदादेशः ।) द्वीपं । इत्यमरः ॥

अन्तरीयं, क्ली, (अन्तरस्य परिधानस्य इदं अन्तर् + छः तस्य ईयः ।) अधोवस्त्रं । परिधानवस्त्रं । इत्यमरः ॥

("नाभौ धृतञ्च यद्वस्त्रं आच्छादयति जानुनी ।
अन्तरीयं प्रशस्तं तत् अच्छिन्नमुभयोस्तयोः" ॥
इत्येवं लक्षणं)

अन्तरीक्षं, क्ली, (अन्तर्मध्ये ऋक्षाणि नक्षत्राणि यस्य तत्, पृषोदरादित्वात् ऋकारस्य ईकारः ।) गगनं । इत्यमरः ॥ अभ्रकधातुः । इति राजनिर्घण्टः ॥

अन्तरीक्षजलं, क्ली, (अन्तरीक्षस्य आकाशस्य जलं षष्ठीतत् ।) आकाशजलं । दिव्योदकं । इति राजनिर्घण्टः ॥

अन्तरे, व्य (अन्तरेति अन्तर + इण् + विच् तस्य लोपः ।) मध्यं । अभ्यन्तरं । इत्यमरः ॥

अन्तरेण, व्य (अन्तरेति अन्तर + इण + णः तस्य नेत्वं पृषोदरादित्वात् ।) मध्यं । विना । व्यतिरेकः । इत्यमरः ॥

अन्तर्गडुः, त्रि, (अन्तर्मध्ये गडुः ग्रीवाप्रदेशजातगलमांसपिण्डमिव निरर्थकः ।) निरर्थकः । वृथा । इति हेमचन्द्रः ॥

("काव्यान्तर्गडुभूता या सा तु नेह प्रशस्यते" ।
इति साहित्यदर्पणे ।)

अन्तर्गतं, त्रि, (अन्तः अन्तकरणात् गतं, अथवा अन्तर्मध्ये गतं प्राप्तम् ।) विस्मृतं । मध्यप्राप्तं । इति हेमचन्द्रः ॥ ("अन्तर्गतशवे ग्रामे" । इति मनुः । "सागरान्तर्गताः केचित् केचित् पर्व्वतमाश्रिताः" । इति रामायणम् । आभ्यन्तरः । हृदयमध्यस्थितः । अन्तःकरणस्थः । "अन्तर्गतप्रार्थनमन्तिकस्थं" । इति शाकुन्तले ।

"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः" ॥
इति मनुः ।)

अन्तर्गृहं, क्ली, (गृहस्य मध्ये, अव्ययीभावः ।) गृहमध्यं । इति नानार्थकोषशब्दार्थे अमरः ॥ घरेर भितर इति भाषा । (वाराणसीस्थे सप्तावरणवति स्थानविशेषे ।

"अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति ।
वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति ॥
पञ्चक्रोश्यां कृतं पापं अन्तर्गृहे विनश्यति" ।
इति काशीमाहात्म्यम् ।)

अन्तर्जठरं, क्ली, (जठरस्य उदरस्य मध्ये अव्ययीभावः ।) कुक्षिमध्यं । कोष्ठं । इत्यमरः ॥

अन्तर्दधनं, क्ली, (अन्तर्मध्ये दध्यते मत्तता क्रियतेऽनेन, अन्तर् + दध् + करणे ल्युट् ।) सुरावीजं । इति शब्दचन्द्रिका ॥

अन्तर्दाहः, पुं, (अन्तर्मध्ये दाहः सन्तापः ।) कोष्ठसन्तापः । शरीराभ्यन्तरज्वाला । इति राजनिर्घण्टः ॥

अन्तर्द्धा, स्त्री, (अन्तर्द्धानं, अन्तर् + धा + भावे अङ् स्त्रियां टाप् ।) अन्तर्द्धानं । इत्यमरः ॥

अन्तर्द्धानं, क्ली, (अन्तर्धानं, अन्तर् + धा + भावे ल्युट् ।) आच्छादनं । इति शब्दरत्नावली ॥ तत्पर्य्यायः । अन्तर्द्धा २ व्यवधा ३ अन्तर्द्धिः ४ अपवारणं ५ अपिधानं ६ तिरोधानं ७ पिधानं ८ छदनं ९ । इत्यमरः ॥

("अन्तर्द्धानं स्मृतिः कान्तिर्दृष्टिः श्रोतज्ञता तथा"
इति याज्ञवल्क्यः ।)

अन्तर्द्धिः, पुं, (अन्तर्द्धानम् अन्तर् + धा + भावे कि ।) अन्तर्द्धानं । इत्यमरः ॥

अन्तर्द्वारं, क्ली, (अन्तर्गृहमध्यस्थं द्वारं ।) प्रकोष्ठद्वारं । इति भरतः ॥ गृहाभ्यन्तरद्वारं । गृहाभ्यन्तरप्रकोष्ठादिद्वारं जालद्वारं वा । इति स्वामी ॥ तत्पर्य्यायः । प्रच्छन्नं २ । इत्यमरः ॥ पक्षद्वारं खड्किकाद्वारं । यथा,—

"प्रच्छन्नमन्तर्द्वारस्य पक्षद्वारं तदुच्यते" ।
इति शवरस्वामी ॥

अन्तर्भूतः, त्रि, (अन्तर्मध्ये भूतः स्थितः, अन्तर् + भू + कर्त्तरि क्तः ।) गुणीभूतः । अन्तःस्थः । अन्तरस्थः । अन्तर्गतः । यथा,—

"स एव भगवान् विष्णुरन्तर्भूतः सनातनः" ।
इति पद्मपुराणे माघमाहात्म्यं ॥

अन्तर्मनाः, [स्] त्रि, (वाह्यव्यापारशून्यतया अन्तर्गमनः चेतो यस्य सः ।) दुर्म्मनाः । विमनाः । व्याकुलचेताः । इत्यमरः ॥

अन्तर्यामी, [न्] पुं, (अन्तर्मध्ये यमयति स्वस्वकार्य्येषु इन्द्रियादीनि नियोजयति, अन्तर् + यम् + णिच् + उपपदसमासः ।) अन्तःकरणनियामकः । तत्पर्य्यायः । आत्मा २ जीवः ३ पुरुषः ४ पुद्गलः ५ ईश्वरः ६ । इति त्रिकाण्डशेषः ॥ विशुद्धसत्वप्रधानाज्ञानोपहितचैतन्यं । इति वेदान्तसारः ॥ मनोगतञ्च त्रि ॥

("अन्तराविश्य भूतानि योविभर्त्त्यात्मकेतुभिः ।
अन्तर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटम्" ।)

अन्तर्वंशिकः, पुं, (वंशः स्वावलम्बनयष्टिर्विद्यतेऽस्य, वंश + ठक् तस्य इकः, अन्तः नृपान्तःपुरे वंशिकः यष्टिधारी नियुक्तः पुरुषः ।) अन्तःपुराधिकृतः अन्तःपुराध्यक्षः । इत्यमरः ॥

अन्तर्व्वत्नी, स्त्री, (अन्तर्गर्भमध्यस्थमपत्यं विद्यतेऽस्याः, अन्तर् + मतुप्, अन्तर्व्वत्पतिवतोर्नुक् इति ङीप्नुगागमौ ।) गर्भिणी । इत्यमरः ॥

("तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती ।
सुतावसूत सम्पन्नौ कोषादण्डाविव क्षितिः" ॥
इति रघुवंशे ।)

अन्तर्व्वमिः, पुंः (अन्तः कुक्षिमध्यात् वमयति उद्गारयति अन्तर् + वम् + णिच् + इक् कृष्यादिभ्य इति बाहुल्यात् इक् ।) अपाकः । अजीर्णः । इति त्रिकाण्डशेषः ॥

अन्तर्व्वाणिः, त्रि, (अन्तः अन्तःकरणे वाणी शास्त्रविहिता वाक् यस्य सः, कृष्णः ।) शास्त्रवित् । शास्त्रज्ञः । इत्यमरः ॥

अन्तर्व्विगाहनं, क्ली, (अन्तर्मध्ये विगाहनं प्रवेशः, अन्तर् + वि + गाह् + ल्युट् ।) प्रवेशनं । इति हेमचन्द्रः ॥

अन्तर्व्वेदी, स्त्री, (अन्तः पृथ्वीमध्यस्थतया वेदीव । अन्तर्वेदि इति पाठे अन्तर्मध्ये वेदिर्यत्र देशे सः ।) ब्रह्मावर्त्तदेशः । गङ्गायमुनयोर्म्मध्यदेशः । आप्रयागहरिद्वारपर्य्यन्तदेशः । दोयाव इति पश्चिमदेशे ख्याता । तत्पर्य्यायः । शशस्थली २ । इति त्रिकाण्डशेषः ॥

अन्तर्हासः, पुं, (अन्तरव्यक्तोहासः हास्यं ।) अव्यक्तहासः । गूढ़हास्यं । तत्पर्य्यायः । उद्दर्द्धनं २ । इति त्रिकाण्डशेषः ॥ तद्वति त्रि ॥ ("ततोऽन्तर्हासविकासमुखः स तदुचितमाचचार" । इति पञ्चतन्त्रं । "सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे" । इति मेघदूतम् ।)